# संस्कृत वार्ताः

**दिनाङ्क :- 06.05.2025** **प्रातः - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीयान्वेषणविभागस्य सी.बी.आई. इत्यस्य नवनिदेशकाय नियुक्तिसमित्या: उपवेशनस्य अध्यक्षतां कृतवान्। उपवेशनमिदं प्रधानमन्त्रिकार्यालये समनुष्ठितम्। एतस्मिन् उपवेशने भारतस्य मुख्यन्यायाधीश: न्यायमूर्ति: सञ्जीवखन्ना: लोकसभायां च विपक्षदलीय: नेता राहुलगांधी भागं स्वीकृतवन्तौ। उपवेशनेऽस्मिन् आगामिन: सी.बी.आई. इत्येतस्य विभागस्य निदेशकस्य नियुक्तिविषये चर्चा सम्पादिता। वर्तमानस्य सी.बी.आई. निदेशकस्य प्रवीणसूदस्य वर्षद्वयस्य कार्यकाल: मेमासस्य पञ्चविंशे दिनाङ्के अवसीयते। अवधेयं वर्तते यत् सीबीआई-निदेशकस्य नियुक्ति: केन्द्रप्रशासनस्य त्रिसदस्यात्मिकीयाया: नियुक्तिसमित्या: अनुशंसाधारे भवतीति। समित्या: अध्यक्षता प्रधानमन्त्रिणा सम्पाद्यते। अस्यां समित्या लोकसभायां विपक्षस्यनेता अथच भारतस्य मुख्यन्यायाधीशश्च सम्मिलितौ भवत:।

**भारत- रूस:**

रशियादेशीय: राष्ट्रपतिः व्लादिमीर् पुतिनः ह्य: प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं कृत्वा पहलगामातङ्क्याक्रमणस्य कठोरनिन्दां कृतवान्। दूरभाषेण वार्तालापकाले राष्ट्रपतिना पुतिन इत्यमुना निर्दोषाणां प्राणहानिविषये गभीराः शोकसंवेदनाः प्रकटिताः तथा च आतङ्कवाद-विरुद्ध-युद्धे भारतस्य पूर्णसमर्थनं च प्रकटितम्। सः जघन्यस्य आक्रमणस्य अपराधिनः तेषां समर्थकाः च न्यायालये आनेतव्याः इत्यवोचत्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः सामाजिकमाध्यम-पटले अलिखत् यत् वार्तालापकाले उभौ नेतारौ भारतस्य रशियादेशस्य च मध्ये विशेषाधिकारयुक्तं सामरिक-सहयोगम्, अधिकं गभीरं कर्तुं स्वप्रतिबद्धतां पुनरुक्तवन्तौ। प्रधानमन्त्री मोदी अशीतितमं वार्षिक-विजयदिवसमुद्दिश्य राष्ट्रपतये पुतिन इत्यस्मै अभिनन्दनं कृतवान् तथा च इतःपरं भारते आयोजयिष्यमाणा-वार्षिकशिखरसम्मेलनाय आमन्त्रितवान्।

**भारतजापानदेशौ**

भारतजापानदेशौ आतङ्कवादस्य सर्वाणिरूपाणि निन्दितवन्तौ अपि च उभयो: देशयार्मध्ये निहितद्विपक्षीयसम्बन्धान् सुदृढीकर्तुं क्षेत्रीयशान्त्याम् योगदानं प्रदातुं च स्वप्रतिबद्धतां पुनरावर्तितवन्तौ। ह्य: नवदिल्ल्यां रक्षामन्त्री राजनाथसिंह: तस्य च जापानदेशीयेन समकक्षेण जनरल-नाकातानी-इत्येतेन सह जाते उपवेशने उभौ देशौ भारत-जापान कार्यनीतिकस्य वैश्विक-सहकार्यस्य रक्षा-सुरक्षयो: विविधान् उपायान् समीक्षितवन्तौ।

**गृहमन्त्रालय:**

केन्द्रीयगृहमन्त्रालयेन राज्यानि केन्द्रशासितप्रदेशाश्च श्व: नागरिकसुरक्षासज्जताया: मूल्याङ्कनाय मॉकड्रिल इति आपात्कालिक-कृत्रिमाभ्यासं समायोजयितुम् आदिष्टा:। मन्त्रालयेन देशस्य चतुश्चत्वारिंशत् वर्गीकृत-नागरिक-सुरक्षा-जनपदेषु नागरिकसुरक्षाभ्यासस्य आयोजनस्य निर्णय: गृहीत:।

**राजनाथसिंह:**

भारतीयनौसैन्यबलं रक्षानुसन्धान-विकाससङ्घटनं च स्वदेशे शैलीगत-विकसितस्य मल्टी-इन्फ्लुएंस-ग्राउण्ड-माइन-(MIGM) इत्येतस्य सफलतापूर्वकं योद्ध-प्रक्षेपणम् कृतवती। रक्षामन्त्री राजनाथसिंह: समधिगतोपलब्धौ भारतीयनौसेनायै डीआरडीओ इत्येतस्मै च वर्धापनानि अयच्छत्।

**जितेन्द्रसिंह:**

विज्ञानप्रौद्योगिकीराज्यमन्त्री जितेन्द्रसिंह: भारतीय-ए.आई. ओपन-स्टैक-इत्येतस्य 'स्वदैशिक-निर्माणस्य' महत्त्वं प्रतिपादितवान्। यद्धि भारतीयानुसन्धानकर्तृभ्य: अनूकूलतां सम्प्राप्य विज्ञानाभियान्त्रिक-प्रतिमानै: सह एकीकृतस्य ए.आई. इत्येतस्य वास्तुकलात्वेन वर्तते। असौ ह्य: नवदिल्ल्यां विज्ञानप्रौद्योगिकी विभागस्य समीक्षोपवेशनम् कृतवान्।

**आई.पी.एल्.**

आई.पी.एल्. इत्येतस्यां क्रिकेट्-स्पर्धा-मालिकायाम् ह्य: रात्रौ प्रतिस्पर्धा वर्षाकारणेन बाधिता समभवत्। अद्य मुम्बईइण्डियन्सदलं गुजरात-टाइटन्स-दलेन साकं वानखेड़े-क्रीडाङ्गणे द्वन्द्वं करिष्यति।

**॥ इति वार्ताः॥**